# द्वितीयः पाठः

# एषः कः ? एषा का ? एतत् किम् ?

0672CH02

## पुंलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  |  |  |
| बालकः | बालकौ | बालकाः |
|  |  |  |
| वृक्षः | वृक्षौ | वृक्षाः |
|  |  |  |
| गजः | गजौ | गजाः |

## स्त्रीलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  |  |  |
| बालिका | बालिके | बालिकाः |

© NCERT not to be republished

| | | |
|---|---|---|
|  |  |  |
| वैद्या | वैद्ये | वैद्याः |
|  |  |  |
| अजा | अजे | अजाः |

## नपुंसकलिङ्गम्

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
|  |  |  |
| पत्रम् | पत्रे | पत्राणि |
|  |  |  |
| चक्रम् | चक्रे | चक्राणि |
|  |  |  |
| पुस्तकम् | पुस्तके | पुस्तकानि |

© NCERT not to be republished

# क्रियापदानि

| एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- |
|  पठति |  पठतः |  पठन्ति |
|  पिबति |  पिबतः |  पिबन्ति |
|  खादति |  खादतः |  खादन्ति |
|  गच्छति |  गच्छतः |  गच्छन्ति |
|  क्रीडति |  क्रीडतः |  क्रीडन्ति |

© NCERT not to be republished

## सर्वनामप्रयोगः



सः शुकः



तौ शुकौ



ते शुकाः



एषः बालकः



एतौ बालकौ



एते बालकाः



सा शिक्षिका



ते शिक्षिके



ताः शिक्षिकाः



एषा बालिका



एते बालिके



एताः बालिकाः



तत् फलम्



ते फले



तानि फलानि



एतत् फलम् ।



एते फले



एतानि फलानि

© NCERT not to be republished

## पुंलिङ्गम् (एकवचनम्)

सः कः?

सः शिक्षकः।

सः किं करोति ?

सः पाठयति।

किं सः भ्रमति ?

न, सः न भ्रमति।

सः तु पाठयति।



## पुंलिङ्गम् (द्विवचनम्)

तौ कौ ?

तौ मयूरौ।

तौ किं कुरुतः ?

तौ नृत्यतः।

किं तौ खादतः ?

न, तौ न खादतः।

तौ तु नृत्यतः।



## पुंलिङ्गम् (बहुवचनम्)

ते के ?

ते बालकाः।

ते किं कुर्वन्ति ?

ते क्रीडन्ति।

किं ते गायन्ति ?

न, ते न गायन्ति।

ते तु क्रीडन्ति।



© NCERT not to be republished

## पुंलिङ्गम् (एकवचनम्)

एष: क: ?

एष: शिक्षक: ।

शिक्षक: किं करोति ?

शिक्षक: लिखति ।

किम् एष: पठति ?

न, एष: न पठति । एष: लिखति ।



## पुंलिङ्गम् (द्विवचनम्)

एतौ कौ ?

एतौ बालकौ ।

बालकौ किं कुरुत: ?

बालकौ पठत: ।

किम् एतौ लिखत: ?

न, एतौ न लिखत: । एतौ तु पठत: ।



## पुंलिङ्गम् (बहुवचनम्)



एते के ?

एते बालका: ।

बालका: किं कुर्वन्ति ?

बालका: पिबन्ति ।

किम् एते पिबन्ति ?

आम्, एते फलरसं पिबन्ति ।

© NCERT not to be republished

## स्त्रीलिङ्गम् (एकवचनम्)

सा का ?

सा वृद्धा।

सा किं करोति ?

सा विहरति।

किं सा क्रीडति ?

न, सा न क्रीडति।

सा तु विहरति।



## स्त्रीलिङ्गम् (द्विवचनम्)

ते के ?

ते अजे।

ते किं कुरुत: ?

ते चरत:।

किं ते पिबत: ?

न, ते न पिबत:।

ते तु चरत:।



## स्त्रीलिङ्गम् (बहुवचनम्)

ताः का: ?

ताः महिला:।

ताः किं कुर्वन्ति ?

ताः धावन्ति।

किं ताः गायन्ति ?

न, ताः न गायन्ति।

ताः तु धावन्ति।



© NCERT not to be republished

## स्त्रीलिङ्गम् (एकवचनम्)

एषा का ?

एषा लता।

एषा किं करोति ?

एषा खादति।

किम् एषा पठति ?

न, एषा न पठति। एषा तु खादति।



## स्त्रीलिङ्गम् (द्विवचनम्)

एते के ?

एते बालिके।

एते किं कुरुत: ?

एते भ्रमत:।

किम् एते धावत: ?

न, एते न धावत:। एते तु भ्रमत:।



## स्त्रीलिङ्गम् (बहुवचनम्)



एता: का: ?

एता: अजा:।

एता: किं कुर्वन्ति ?

एता: चरन्ति।

किम् एता: धावन्ति ?

न, एता: न धावन्ति। एता: तु चरन्ति।

© NCERT not to be republished

## नपुंसकलिङ्गम् (एकवचनम्)

तत् किम् ?

तत् चन्द्रयानम् ।

किं तत् विमानम् ?

न, तत् विमानं न ।

तत् तु चन्द्रयानम् अस्ति ।



## नपुंसकलिङ्गम् (द्विवचनम्)

ते के ?

ते पुस्तके ।

किं ते पत्रे ?

न, ते पत्रे न ।

ते तु पुस्तके स्तः ।




## नपुंसकलिङ्गम् (बहुवचनम्)

तानि कानि ?

तानि रेलयानानि ।

किं तानि बसयानानि ?

न, तानि बसयानानि न ।

तानि तु रेलयानानि सन्ति ।




© NCERT not to be republished

## नपुंसकलिङ्गम् (एकवचनम्)

एतत् किम् ?

एतत् दूरदर्शनम् ।

किम् एतत् सङ्गणकम् ?

न, एतत् सङ्गणकं न ।

एतत् तु दूरदर्शनम् अस्ति ।



## नपुंसकलिङ्गम् (द्विवचनम्)

एते के ?

एते फले ।

किम् एते कन्दुके ?

न, एते कन्दुके न ।

एते तु फले स्तः ।



## नपुंसकलिङ्गम् (बहुवचनम्)

एतानि कानि ?

एतानि पुस्तकानि ?

किम् एतानि सोपानानि सन्ति ?

न, एतानि सोपानानि न ।

एतानि तु पुस्तकानि सन्ति ।



© NCERT not to be republished

**उच्चैः पठन्तु स्मरन्तु अवगच्छन्तु च**

| पुंलिङ्गम् | | | स्त्रीलिङ्गम् | | | नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|
| एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| सः | तौ | ते | सा | ते | ताः | तत् | ते | तानि |
| एषः | एतौ | एते | एषा | एते | एताः | एतत् | एते | एतानि |
| कः | कौ | के | का | के | काः | किम् | के | कानि |

## वयं शब्दार्थान् जानीम:

| शब्द: | अर्थ: | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| लता | वल्ली | बेल | Creeper | |
| फलम् | फलम् | फल | Fruit | |
| पुस्तकम् | ग्रन्थ: | पुस्तक | Book | |
| अजा | छागी | बकरी | Goat | |
| सोपानम् | आरोहणम् | सीढ़ी | Stairs | |
| सङ्गणकम् | सङ्गणकयन्त्रम् | सङ्गणक | Computer | |
| दूरदर्शनम् | दूरदर्शनम् | दूरदर्शन | Television | |

## वयम् अभ्यासं कुर्म:

१. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयन्तु।

| | | | |
|---|---|---|---|
| यथा - | बालक: | बालकौ | बालका: |
| (क) | चषक: | .................. | .................. |
| (ख) | .................. | .................. | देवा: |
| (ग) | सैनिक: | .................. | .................. |
| (घ) | .................. | रजकौ | .................. |
| (ङ) | तन्त्रज्ञ: | .................. | .................. |



२. उदाहरणानुसारं पट्टिकात: पदानि चित्वा रिक्तस्थानेषु संयोजयन्तु।

यथा - स: शुक:। .................. ..................

स: .................. .................. ..................

सा .................. .................. ..................

तत् .................. .................. ..................

शुक: स्यूत: अजा फलम्
पुष्पम् महिषी वृक्ष: कुक्कुर:
पार्वती पुस्तकम्

© NCERT not to be republished

३. चित्राणि दृष्ट्वा संस्कृतपदानि लिखन्तु।



(क) ................................



(ख) ................................



(ग) ................................



(घ) ................................



(ङ) ................................



(च) ................................

४. उदाहरणानुसारं पट्टिकातः पदानि चित्वा रिक्तस्थानेषु लिखन्तु।

बालकाः वृक्षाः शिक्षिकाः पुष्पम् फलम् अजाः
मापिकाः गायिका रजकः फलानि सः लेखनी

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| यथा - | पुष्पम् | बालकाः |
| (क) | ........................ | ........................ |
| (ख) | ........................ | ........................ |
| (ग) | ........................ | ........................ |
| (घ) | ........................ | ........................ |
| (ङ) | ........................ | ........................ |



© NCERT not to be republished

५. पट्टिकायां कानिचन पदानि सन्ति, तानि पदानि उचिते घटे पूरयन्तु ।

सैनिकः कुक्कुरः गायिका महिषी जलम् चषकः द्वारम्
फलम् वृद्धा वृक्षः अजा वातायनम् अङ्कनी पुस्तकम् शुकः




६. उदाहरणानुसारं पट्टिकातः उपयुक्तपदं चित्वा रिक्तस्थानानि पूरयन्तु ।

माला युवकौ पाठशाला मुखम् कमले
भवनानि बिडालः छात्राः लेखन्यौ मालाः

यथा - सा का ? सा पाठशाला ।

सः कः ? ................ तौ कौ ? ................ ते के ? ................

सा का ? ................ ते के ? ................ ताः काः ? ................

तत् किम् ? ................ ते के ? ................ तानि कानि ? ................




७. निम्नलिखितानि वाक्यानि अधिकृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुर्वन्तु ।

यथा - सः गजः। – सः कः?

(क) सः बालकः । – ........................ (ख) सा लता । – ........................

(ग) सा नदी । – ........................ (घ) तत् फलम् । – ........................

(ङ) सः वृक्षः । – ........................

© NCERT not to be republished

८. परस्परं सम्बद्धानि पदानि संयोजयन्तु, रिक्तस्थानेषु पूरयन्तु च ।



| | | | |
|---|---|---|---|
| (क) | कमलम् | गायति | कमलं विकसति । |
| (ख) | लेखकः | चालयति | ................................ |
| (ग) | फलम् | विकसति | ................................ |
| (घ) | नर्तकः | लिखति | ................................ |
| (ङ) | चालकः | पतति | ................................ |
| (च) | गायिका | नृत्यति | ................................ |

९. कोष्ठकेभ्यः उचितानि पदानि चित्वा वाक्यानि रचयन्तु ।

यथा - कः / का लिखति ? लेखकः लिखति । छात्रः लिखति । सा लिखति ।

(क) कः/ का धावति ? (बालकाः, बालिका, शुनकः) .................. । .................. । .................. ।

(ख) कः/ का पठति ? (सुरेशः, जानकी, नलिनी) .................. । .................. । .................. ।

(ग) किं पतति ? (फलम्, जलम्, कुसुमम्) .................. । .................. । .................. ।

(घ) का / कः गच्छति ? (शिक्षिका, बालिका, तन्त्रज्ञः) .................. । .................. । .................. ।

(ङ) का / कः / किम् अस्ति ? (माता, पिता, वाहनम् ) .................. । .................. । .................. ।



## योग्यताविस्तरः

### अकारान्तः शब्दः



यस्य शब्दस्य अन्ते 'अ'वर्णः अस्ति सः अकारान्तः शब्दः भवति ।

(एतादृशः शब्दः पुंलिङ्गे अथवा नपुंसकलिङ्गे भवति ।)

यथा - बालक्+अ    हस्त् + अ    अज् + अ

फल् + अ    ज्ञान् + अ    गृह् + अ

© NCERT not to be republished

### आकारान्तः शब्दः

यस्य शब्दस्य अन्ते ‘आ’वर्णः अस्ति सः आकारान्तः शब्दः भवति।

(एतादृशः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

**यथा** - बालिक् + आ  रम् + आ  लत् + आ



### ईकारान्तः शब्दः

यस्य शब्दस्य अन्ते ‘ई’वर्णः अस्ति सः ईकारान्तः शब्दः भवति।

(ईकारान्तः शब्दः प्रायशः स्त्रीलिङ्गे भवति।)

**यथा** - नद् + ई  लेखन् + ई  घट् + ई

## तत् एतत् किम्

| | | | | |
|---|---|---|---|---|
| * | दकारान्त-पुंलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'सः' | इति। |
| * | दकारान्त-पुंलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एषः' | इति। |
| * | दकारान्त-स्त्रीलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'सा' | इति। |
| * | दकारान्त-स्त्रीलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एषा' | इति। |
| * | दकारान्त-नपुंसकलिङ्गस्य | 'तद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'तत्' | इति। |
| * | दकारान्त-नपुंसकलिङ्गस्य | 'एतद्'-शब्दस्य प्रथमैकवचन-रूपम् | 'एतत्' | इति। |
| * | मकारान्त-पुंलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'कः' | इति। |
| * | मकारान्त-स्त्रीलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'का' | इति। |
| * | मकारान्त-नपुंसकलिङ्गस्य | 'किम्'-शब्दस्य प्रथमैकवचन-रूपम् | 'किम्' | इति। |

© NCERT not to be republished



## परियोजनाकार्यम्

१. गृहजनानां मित्राणां वा साहाय्येन पञ्चदश (१५) गृहवस्तुनामानि लिङ्गविभागेन लिखन्तु।



२.  अध: केचन व्यावहारिका: शब्दा: सन्ति। तेषाम् अर्थं शिक्षकस्य साहाय्येन अन्विष्य लिखन्तु।

| अकारान्त-पुंलिङ्गम् | आकारान्त-स्त्रीलिङ्गम् | ईकारान्त-स्त्रीलिङ्गम् | अकारान्त-नपुंसकलिङ्गम् |
|---|---|---|---|
| आसन्द: | बालिका | लेखनी | फलम् |
| सुधाखण्ड: | महिला | अङ्कनी | उपनेत्रम् |
| स्यूत: | शाटिका | दूरवाणी | युतकम् |
| विद्यालय: | पेटिका | कूपी | मन्दिरम् |
| वृक्ष: | पादुका | द्रोणी | भवनम् |
| कट: | उत्पीठिका | नदी | वातायनम् |
| ताल: | रोटिका | घटी | व्यजनम् |
| दर्पण: | स्थालिका | नर्तकी | भोजनम् |
| दीप: | कुञ्चिका | वेणी | कदलीफलम् |
| घट: | सूचिका | कर्तरी | पाथेयपात्रम् |
| दण्डदीप: | तूलिका | गृहिणी | द्वारम् |
| गज: | मञ्जूषा | मार्जनी | वलयम् |
| नागदन्त: | छुरिका | सम्मार्जनी | उद्यानम् |
| रजक: | गृहगोधिका | सखी | सूच्यौषधम् |
| धीवर: | धूमनलिका | आकाशवाणी | उपांशुकम् |
| युवक: | दिनदर्शिका | वर्णलेखनी | पादांशुकम् |
| प्रश्न: | खट्वा | जननी | दिनम् |
| शुनक: | शाखा | नारी | उत्तरम् |
| आचार्य: | शिक्षिका | नगरी | उष्णीषम् |
| खग: | गुलिका | पुन:पूरणी | वस्त्रम् |
| सागर: | पिपीलिका | कुमारी | नगरम् |

© NCERT not to be republished